# Shri Sharadadevi Stotram

# શ્રીશારદાદેવીસ્તોત્રમ્

## Document Information

Text title : Shri Sharadadevi Stotram

File name : shAradAdevIstotram5.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Abhedanandasvamina

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીશારદાદેવીસ્તોત્રમ્

સંસારસારભૂતા યા, શારદા માતૃરૂપિણી
ગાઢ઼ાન્ધતમસિ સા વૈ, જ્ઞાનદીપ સ્વરૂપિણી ।
જનાનાં હૃદિસંસ્થા યા, શોભમાના નિરન્તરમ્
શારદાં સારદાં તાં વૈ શિરસા પ્રણમામ્યહમ્ ॥ ૧॥

અભ્યુદયાય નારીણાં યાઽવિર્ભૂતા મહીતલે
દુઃખાર્તાનાં સેવાયૈ યા સર્વકાલેષુ તત્પરા ।
તૃષ્ણાપ્રશમનાર્થં યા, કારુણ્યામૃતવર્ષિણી
કરુણાર્દ્રાં શારદાં તાં ભૂયો ભૂયો નમામ્યહમ્ ॥ ૨॥

અનુભવાય દારિદ્ર્યદુઃખં સમ્યક્રૂપેણ યા
કુટીરે રામચન્દ્રસ્ય સાગતા ધરણીમિહ ।
બાલ્યાત્ પ્રભૃતિ યા ગુણૈર્જનચિત્તાપહારિણી
શારદાં સ્નેહરૂપાં તાં ભક્તિતઃ પ્રણમામ્યહમ્ ॥ ૩॥

ઘોષિકા નવયુગાનાં પત્યા સમ્પૂજિતા સતી
રામકૃષ્ણસ્ય દયિતા, તદ્ભાષ્ય રૂપિણી તુ યા ।
મહાસઙ્ઘસ્ય જનની વરેણ્યા ગુરુરૂપિણી
સ્ત્રી રત્નભૂતા યા દેવી શારદાં તાં નમામ્યહમ્ ॥ ૪॥

મર્ત્યાનાં જનનીં દેવીમખિલાર્તિપ્રણાશિનીમ્
સદસચ્ચેતરે જીવા યેઽન્યે કૃપાભિલાષુકાઃ ।
યત્કૃપાદૃષ્ટિમાત્રેણ ધન્યાઃ સર્વેઽભવન્નિહ
સર્વજીવપ્રસૂં દેવીં શારદાં તાં સ્મરામ્યહમ્ ॥ ૫॥

અમૃતભાષિણીં દેવીં શ્રવણસુખદાં તથા
સુસ્મિતવદનાં ચૈવ, નયનાનન્દદાયિનીમ્ ।
નિર્વાણદાયિનીં દેવીં મોહમેધાપહારિણીમ્
મુક્તિમાર્ગપ્રદાત્રીં તાં શારદાં સંસ્મરામ્યહમ્ ॥ ૬॥

પરમાં પ્રકૃતિં દેવીં સર્વકારણરૂપિણીમ્
 સચ્ચિદાનન્દદાં દેવીં ક્ષમાવિગ્રહધારિણીમ્ ।
સર્વેષામાદિભૂતાં તાં ભવભીતેઃ પ્રણાશિણીમ્
 શારદાં જ્ઞાનદાત્રીં તાં પુનઃ પુનર્નમામ્યહમ્ ॥ ૭॥

ચન્દ્રાદપ્યકલઙ્કા યા, યાષ્ટાસખીસમાવૃતા,
 જાનકી-રાધિકા દેવ્યોઃ યા પ્રતીકસ્વરૂપિણી ।
આનન્દઘટરૂપેણ પત્યુઃ સ્મૃતિં વહન્તિ યા
 ગૃહ્ણીયાત્ શારદા માતા મમેદં વાક્ય સંસ્તવમ્ ॥ ૮॥

ઇતિ અધ્યાપિકા (કુમારી) મિતારાયચતુર્ધુરિણ્યાવિરચિતં
 “શ્રીશ્રીશારદાદેવીસ્તોત્રમ્” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Sharadadevi Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*